# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - V**

**Time : 3 Hours** **(Pages 11)** **Marks : 100**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ | मरीचिका  | ५ |  |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. ८० - २. षण्णवतिः -

३. षोडश -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | सपाद - दशवादनम् | ४:०५ |
| २. | पञ्चाधिक - चतुर्वादनम् | १२:३० |
| ३. | सार्ध - द्वादशवादनम् | ७:४५ |
| ४. | पादोन - अष्टवादनम् | १०:१५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| परह्यः ________ | ← | ________ सोमवासरः | ← | अद्य मङ्गलवासरः | → | श्वः ________ |
|---|---|---|---|---|---|---|

**प्र.१ उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. स्वराश्रितौ -

२. ह्रस्वस्वरौ -

३. अकारान्तस्य -

४. स्त्रीलिङ्गस्य -

५. चतुर्थगणस्य धातू -

६. षष्ठगणस्य धातू -

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

द्वितीयः प्रसङ्गः । यस्माद् ज्ञानं लभते स गुरुः ।

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत् । तदा मार्गे कोऽपि दरिद्रिः मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत् । तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन् ।

सः मनुष्यः अपृच्छत् - ''अपसर, अपसर इति कं वदसि ? शरीरं वा आत्मानं वा ? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव । तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि । तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः ?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम । ज्ञानं तु कस्मादपि ग्राह्यम् । यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान् ।

एवम् आसेतुहिमाचलं पर्यटन् अद्वैत-सिद्धान्तस्य प्रचारम् अकरोत् सः ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ॥

**१. अवबोधनम् । (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

शङ्करः मलिनकायं मनुष्यं प्रणनाम यतः .......

(अ) मलिनकायः मनुष्यः शङ्करं सङ्कटात् अरक्षत् ।

(ब) सः मनिलकायः मनुष्यः वेदान्तस्य सारं जानाति स्म ।

**ख) कः कं वदति ।** १

'अपसर, अपसर !'

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १
शङ्कराचार्यः आसेतुहिमाचलं पर्यटन् किम् अकरोत् ?

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**
**क) गद्यांशतः पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत ।** १

**ख) प्रश्ननिर्माणं कुरुत ।** १
आचार्यः षोडशे भाष्यं कृतवान् ।

**ग) सन्धिविग्रहं कुरुत ।** १
गुरुरेव - ....... + ....... ।

**३. पृथक्करणम् ।** २
**क्रमेण योजयत ।**
(१) मार्गे मलिनकायपुरुषस्य आगमनम् ।
(२) शिष्यगणेन सह गङ्गास्थानार्थं गमनम् ।
(३) 'मनीषापञ्चकम्' इति स्तोत्रस्य रचना ।
(४) मलिनकायपुरुषस्य मुखात् वेदान्ततत्त्वसारस्य श्रवणम् ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अचिरादेव न इमौ परिचितौ व्याघ्रभल्लूकौ इति धेनुना लक्षितम् । सम्भ्रमेण संशयेन च एकैकशः आवां दृष्टवती । यदा च तस्याः प्रत्ययः जातः तदा शृङ्गे उन्नम्य नौ आक्रामत् । अहमपि गर्जनां कृत्वा तीक्ष्णदन्तान् दर्शितवान् । किन्तु न किञ्चिदपि भयं तस्याः । अब्दुलः तां हस्तेन ताडितवान् । तेन क्षुब्धा सा तम् अन्वधावत् । भल्लूकः तदा चापल्येन पटमण्डपस्तम्भम् आरूढवान् । इयं सर्वा क्रीडा पूर्वनियोजिता इति विचिन्त्य प्रेक्षकाः अपि प्रमुदिताः । भल्लूकः निर्गतः इति क्रुद्धा सा धेनुः अधुना व्याघ्रं मां लक्ष्यं कृतवती ।

भीत्या अहं चतुष्पादविशिष्टं व्याघ्रत्वं विस्मृत्य द्विपादं मूलस्वरूपमाश्रितवान् । ''प्राध्यापकमहाशय, परित्रायतां, परित्रायताम्'' इति करुणं विलपन् अधावम् । तदा धेनोः भीतं, पलायमानं व्याघ्रं दृष्ट्वा प्रेक्षागारे महान् कोलाहलः उत्पन्नः । प्रेक्षकाः मम व्याघ्रवेषं निष्कास्य मां निर्घृणं ताडितवन्तः । वेदनाभिः अहं मूर्च्छितः । यदा च जागरितः तदा अस्माकं शकटः पुनः पुण्यपत्तनदिशं प्रस्थितः आसीत् । मम उत्तमाङ्गम् अन्यानि च अनुत्तमानि अङ्गानि उपचारपट्टिकाभिः विभूषितानि आसन् ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

(१) अब्दुलः तां ......... ताडितवान् । (हस्तेन / हस्तात्)

(२) प्रेक्षकाः मम व्याघ्रवेषं निष्कास्य मां ......... ताडितवन्तः । (निर्घृणं / सस्नेहं)

**ख) पूर्णवाक्येन उत्तरं लिखत ।** १

धेनुना किं लक्षितम् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

धेनुः व्याघ्रात् भीता ।

**घ) कः कं वदति ।** १

'प्राध्यापकमहाशय, परित्रायतां, परित्रायताम्'

**२. शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः ल्यबन्त - अव्यये चित्वा लिखत ।** १

**ख) लकारं लिखत ।** १

सा शृङ्गे उन्नम्य नौ आक्रामत् ।

**ग) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| महान् | धेनुः |
| क्रुद्धा | क्रीडा |
| | कोलाहलः |

**३. पृथक्करणम् ।** २

**क्रमेण योजयत ।**

(१) भल्लूकस्य पटमण्डपस्तम्भम् आरोहणम् ।

(२) धेनोः सम्भ्रमः आक्रमणं च ।

(३) चिमणरावस्य व्याघ्रत्वं विस्मृत्य द्विपादरूपाश्रयः ।

(४) सहभोजनस्य प्रारम्भः ।

**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१. (ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...)

विश्वामित्रः - कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ।।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी (विपाट्)- कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः - अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

२. नदी (विपाट्) - किम् ? एषः मर्त्यः माम् माता इति सम्बोधयति ?

नदी (शुतुद्री) - कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानवश्रेष्ठ साधु ? किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ?

विश्वामित्रः - न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु ।
सर्वे जनाः सुखिनः सन्तुः ।। (विश्वामित्रः निर्गच्छति ।)

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१) पशूनां सहभोजनसमये कः हास्यपूर्णः अनवस्थाप्रसङ्गः समुत्पन्नः ?
२) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम् ?
३) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते च तस्योपरि ।
आर्ये मुञ्च विषादमाशु कमले नाहं प्रकृत्या चला
चेत्थं वै गिरिजासमुद्रसुतयोः सम्भाषणं पातु वः।।
ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

विष्णुः कुत्र शेते ?

**ख) श्लोके 'शिवस्य' कृते निर्दिष्टानि विशेषणानि लिखत ।** १

**ग) रेखाचित्रं पूरयत ।** २




**प्र.३ आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

> रामाभिषेके जलमाहरन्त्या हस्तात् सृतो हेमघटो युवत्याः ।
> सोपानमार्गेण करोति शब्दं ठंठं ठठं ठं ठठठं ठठं ठः ॥
> तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
> निरैक्षद् रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कस्याः हस्तात् सुवर्णघटः पतितः ?

**ख) सन्धिविग्रहं कुरुत ।** १

जटायुरथ - ............... + ............... ।

**ग) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) 'कं संजघान' इति श्लोकं स्पष्टीकुरुत ।

२) 'रे रे चातक' इति श्लोकं स्पष्टीकुरुत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** अयं ............... वा ॥

**ख.** कं ............... शीतम् ॥

२. **ग.** वैद्यराज ............... च ॥

**घ.** राक्षसेभ्यः ............... पण्डितः ॥

**प्र.३ ई) माध्यमभाषया सरलार्थं लिखत । (४ तः ३)** ६

१. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मे सर्वे धर्माः समाश्रिताः ॥

२. सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ॥

३. आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ॥

४. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. गम्-गच्छ् →
२. क्रुध् →
३. वि+तॄ →
४. पत् →
५. रुच् →

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. कनकं महिलानां प्रियम् ।
२. कृष्णः मेघः जलं वर्षति ।
३. शङ्करः पार्वत्याः पतिः ।
४. जलम् एव जीवनम् ।

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ तः १)** ५

१. मम प्रिया भाषा २. मम प्रियं पुस्तकम् । ३. भारतीयं प्रसिद्धं स्थलम् ।

**अथवा**

१. आपणसंवादः २. रुग्णालयसंवादः ३. दूरवाणीसंवादः

प्र.४ इ) निर्दिष्टां कृतीं कुरुत ।

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत । ५




(मञ्जूषा : नृत्यति, पश्यति, शोभते, मुञ्चति, आश्रयते, चलति)

अथवा

प्र.४ इ) संस्कृतानुवादं कुरुत । (८ तः ५)

१. A girl measures with a scale.
२. There are note-books in the bag.
३. Donkey carries a load.
४. Rangoli is seen in front of house.
५. Children play in the water.
६. Cat is my favourite animal.
७. Animals and birds live in the forest.
८. A boy brings a flower.

पञ्चमः विभागः - भाषाभ्यासः ।

प्र.५ अ) तालिकापूर्तिं कुरुत ।

१. नामतालिका । (६ तः ४) २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | ............ | विद्याभिः | तृतीया |
| पितरम् | ............ | ............ | द्वितीया |
| ............ | जन्मनोः | ............ | सप्तमी |

**२. सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | याभ्याम् | ............ | पञ्चमी |
| भवतः | ............ | ............ | षष्ठी |
| ............ | ............ | एताभ्यः | चतुर्थी |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लोट् | ............ | लभेताम् | ............ | प्रथमः पुरुषः |
| लङ् | ............ | ............ | अगच्छत | मध्यमः पुरुषः |
| विधिलिङ् | नृत्येयम् | ............ | ............ | उत्तमः पुरुषः |

**४. धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| दृश्-पश्य् (९ उ.प.) | ............ | दृष्टवान् | दृश्यः | ............ |
| आ+रभ् (१ आ.प.) | ............ | आरब्धवान् | ............ | आरभमाणः |
| कृ (८ उ. प.) | कृतः | ............ | कर्तव्यः | ............ |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. भगवता व्यासेन ...........पुराणानि रचितानि । (अष्टादशः / अष्टादश)

२. दिनस्य ............ लोकयानम् आगच्छति । (नववारं / नवदश)

३. पौषमासः संवत्सरस्य ............ मासः । (दशः / दशमः)

४. ............ महिलाः गृहं गच्छन्ति । (त्रीणि / तिस्रः)

५. भवने मम गृहं ............ तले वर्तते । (सप्तमः / सप्तमे)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | कणादमुनिः | ............ | कर्मधारयः समासः |
| २. | ............ | क्षेत्रस्य पतिः । | षष्ठी-तत्पुरुषः समासः |
| ३. | ............ | दर्शनाय इदम् । | चतुर्थी-तत्पुरुषः समासः |
| ४. | सकोपम् | ............ | अव्ययीभावः समासः |
| ५. | हस्तस्थम् | हस्ते तिष्ठति इति । | ............ |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. मित्रम् × 
२. सुगमः - 
३. पण्डितः × 
४. भाषा - 
५. बलवान् ×

**४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. अहं विरोधं दर्शितवान् । (वाच्यपरिवर्तनं कुरुत ।)
ख. सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कासयत ।)
ग. जनाः वन्यपशून् द्रष्टुम् आगच्छन्ति स्म । ('स्म' निष्कासयत ।)
घ. अपि भवती संस्कृतं पाठयति ? ('भवती' स्थाने 'त्वं' योजयत ।)
ङ. भानुः भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत ।)

**५) वाक्यं शुद्धं कुरुत। (५ तः ३)** ३

१. नदी वेगेन <u>वहन्ति</u> ।
२. <u>जलस्य</u> विना जीवनं नास्ति ।
३. <u>निर्धनः</u> पुरुषं तु मित्राणि अपि त्यजन्ति ।
४. अलं <u>कोलाहलस्य</u> ।
५. <u>सा</u> नृत्यं करोमि ।

**षष्ठः विभागः - अपठितम् ।**

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत ।**

| |
|---|
| 'शरयू' नद्यास्तीरे अयोध्या नाम नगरी आसीत्। तत्र दशरथो नाम नृपालोऽभवत्। प्रजावत्सलः स रामलक्ष्मणभरतशत्रुघ्नानां पिताऽभवत्। दशरथस्य शान्ता नाम्नी एका दुहितासीत्। अर्थात् सा रामस्य स्वसा। रामस्य भार्या सीता। सा दशरथस्य स्नुषा। शान्ता सीतायाः ननान्दा। ऋषिः ऋष्यशृङ्गः शान्तायाः भर्ता। स दशरथस्य जामाता। तथा रामस्यावुत्तः। |

**१) एकवाक्येन उत्तरत ।** १

अयोध्यायां कः नृपः अभवत्?

**२) प्रातिपदिकं लिखत ।** १

१) पिता - ...............
२) शान्तायाः - ...............

३) **वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १
सीता शान्तायाः ननान्दा ।

४) **माध्यमभाषया सरलार्थं लिखत ।** १
रामस्य भार्या सीता । सा दशरथस्य स्नुषा ।

५) **गद्यांशात् प्रथमा-विभक्त्यन्तपदानि चित्वा लिखत ।** १

६) **गद्यांशतः लङ्रूपाणि चित्वा लिखत ।** १

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

विना वेदं विना गीतां विना रामायणीं कथाम् ।
विना कविं कालिदासं कीदृशी भारतीयता ॥

क) **एकवाक्येन उत्तरत । (२ तः १)** १
(१) कं विना न भारतीयता ?
(२) कां विना न भारतीयता ?

ख) **स्तम्भपूरणं कुरुत ।** १

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| १) | रामायणीम् | ............... |
| २) | ............... | कालिदासम् |

**प्र.६ आ) - २) जालचित्रं पूरयत ।** २




**शुभं भवतु** 👍